# भारतीय-विद्या-भवनम्, मुम्बई - ७

**( सरल - संस्कृत - परीक्षा - विभागः )**

# संस्कृत-कोविदः

## SAMSKRITA KOVIDA

**प्रथमं प्रश्नपत्रम् - First Paper**

**( समयः १०.३० तः १२.३० )** **( पूर्णाङ्काः ५० )**

**प्र.१. केचन त्रयः श्लोकाः हिन्द्या/आंग्लभाषया/माध्यमभाषया ससन्दर्भं व्याख्येयाः । ९**

(१) राजमार्गं समावृत्य स्थितं रक्षोबलं महत्।
ददर्श मध्यमे गुल्मे राक्षस्य चरान् बहून्।।

(२) भवनाद् भवनं गच्छन् ददर्श पवनात्मजः।
विविधाकृतिरूपाणि भवनानि ततस्ततः।।

(३) सेना परिच्छदस्तस्य द्वयमेवार्थसाधनम्।
शास्त्रेष्वकुण्ठिता बुद्धिर्मौर्वी धनुषि चातता।।

(४) प्रासादसङ्घातयुतं स्त्रीरत्नशतसंकुलम्।
सुव्यूढकक्ष्यं हनुमान् प्रविवेश महागृहम्।

**प्र.२. केषाञ्चन त्रयाणां प्रश्नानां संस्कृतभाषया उत्तरं लिखत । ६**

(१) कः हरिश्चन्द्रम् अक्रीणात्? (२) नृपस्य दिलीपस्य जन्म कस्मिन् वंशे अभवत्?
(३) कैकेयी राजानं गत्वा किम् अवादीत्? (४) रोहिताश्वः कस्य नृपस्य पुत्रः आसीत्?

**प्र.३. अधोलिखितवाक्येषु पञ्चानां हिन्द्या/आंग्लभाषया/माध्यमभाषया अनुवादः कार्यः। ५**

(१) अस्यां प्रशालायां सायंकाले कथावाचनं भविष्यति। (२) छात्रः अभ्यासेन विद्यां लभते। (३) गोचरभूमौ पशवः चरन्ति। (४) बालकाः मोदकान् प्राप्य मोदन्ते। (५) पक्षिणःवृक्षेषु कूजन्ति। (६) सः मन्दिरं गत्वा परमात्मानं वन्दिष्यते।

**प्र.४. (क) त्रयाणां समासानां विग्रहवाक्यानि विलिख्य समासनामानि लिखत । ३**

(१) नरपतिः। (२) आज्ञाकरः। (३) दशाननः। (४) महागृहम्।

**(ख) त्रयाणां सन्धिविच्छेदं कुरुत । ३**

(१) प्रणवश्छन्दः। (२) अन्वयः। (३) मृत्युरभूत्। (४) परमात्मा।

**(ग) त्रयाणां लिङ्गवचनविभक्तीः लिखत । ३**

(१) मुकुटेन। (२) राजानम्। (३) रमायै। (४) पितुः।

**(घ) ''वद्धातोः'' अथवा ''तप्धातोः'' लोट्लकारे (आज्ञार्थे) रूपाणि लिखत । ३**

**(ङ) त्रयाणां धातुरूपाणां लकार-पुरुष-वचनानि लिखत । ३**

(१) अभक्षयम्। (२) वन्देत। (३) मोदन्ते। (४) भूयात्।

**प्र.५. निम्नलिखितवाक्येषु पञ्चानां संस्कृतभाषया अनुवादं कुरुत । ५**

(१) धनिक निर्धनों को धन देते हैं। (२) जंगल में शेर गर्जना करते हैं। (३) वह अपनी प्रशंसा करता है। (४) उस दुकान में रेशमी साड़ी नहीं है। (५) उस राजमहल में कौन गा रहा है। (६) सैनिक राष्ट्र की रक्षा करते हैं।

(1) Rich people donate money to the poor. (2) Lions roar in the jungle. (3) He praises himself. (4) That Shop does not have silk sarees. (5) Who is singing in that palace.( 6) The soldiers protect the country.

**प्र.६. अधोलिखितस्य गद्यखण्डस्य स्वभाषया अनुवादः कार्यः । १०**

एकस्मिन् तडागे बहवो मण्डूकाः निवसन्ति स्म। एकदा अनध्यायदिने सुखं विचरन्तः केचित् बालकाः तत्तीरे एव क्रीडितुम् अगच्छन्। तत्र क्रीडन्तः ते जले वर्तमानान् मण्डूकान् अपश्यन्। एको बालकः पाषाणेन एकतमं मण्डूकं कौतुकात् आजघान। पाषाणपतनेन जलात् अद्भुतः शब्दः अभवत्। सलिलात् उत्पन्नम् इमं शब्दं श्रुत्वा कौतुकयुक्तो द्वितीयोऽपि बालकः पानीये पाषाणम् अक्षिपत्। बालकम् इमं प्रस्तरान् क्षिपन्तं दृष्ट्वा अन्येऽपि बालकास्तथा अकुर्वन्। सलिले पतितैः पाषाणैः एते दुर्दराः शीर्णाङ्गाः अभवन्।

❑ ❑ ❑

# भारतीय-विद्या-भवनम्, मुम्बई - ७

## ( सरल - संस्कृत - परीक्षा - विभागः )

# संस्कृत-कोविदः

## SAMSKRITA KOVIDA

### द्वितीयं प्रश्नपत्रम् - Second Paper

**( समयः २.०० तः ४.०० )** **( पूर्णाङ्काः ५० )**

**प्र.१. केचन त्रयः श्लोकाः हिन्द्या /आंग्लभाषया /माध्यमभाषया व्याख्येयाः । ९**

(१) नहि रामो महातेजाः शक्यो जेतुं सुरासुरैः ।
राक्षसैर्वापि सर्वेषां स्वर्गः पापजनैरिव ।।

(२) एकेन राजहंसेन या शोभा सरसो भवेत् ।
न सा बकसहस्रेण परितस्तीरवासिना ।।

(३) प्रहर्षिताः केतकपुष्पगन्धमाघ्राय हृष्टा वननिर्झरेषु ।
प्रपातशब्दाकुलिता गजेन्द्राः सार्धं मयूरैः समदा नदन्ति ।।

(४) मनोरथो महानेष भगीरथ महारथ ।
एवं भवतु भद्रं ते इक्ष्वाकुकुलवर्धनः ।।

**प्र.२. अधस्तनस्य गद्यखण्डस्य हिन्द्या/आंग्लभाषया/माध्यमभाषया व्याख्या कार्या । १०**

बहूपकुर्वन्ति वृक्षाः प्राणिनाम्। ते हि असरणानां शरणम्। बुभुक्षितानां भोजनम्। संतप्तानां समाश्रयाः। श्रान्तानां विश्रामगृहाणि। अच्छत्रिणां छत्रम्। निरालम्बिनामालम्बनम्। सुहृदश्च जगतः। नरः वानराः खगाः घुणाश्चापि तेषां पत्राणि पुष्पाणि फलानि मूलानि काष्ठानि च खादन्ति। वृक्षा हि पत्रैः पुष्पैः फलैः छायाभिः दारुभिश्च स्वसम्पद्भिः सदैव अभ्यागतानां जीवानां सत्कारं कुर्वन्त्यलं प्रशंसायै तेषाम्। इदमेवोच्यते-

पत्रपुष्पफलच्छायामूलवल्कलदारुभिः ।
धन्या महीरुहा येभ्यः निराशा यान्ति नार्थिनः।।

**अथवा**

एकस्मिन् महारण्ये कश्चित् सिंहः आसीत्। वनस्य नातिदूरे एव सरः आसीत्। तस्मिन् सरसि एकः मण्डूकः अवात्सीत्। कदाचित् मृगेन्द्रः जलं पातुं सरसस्तस्य तीरमगच्छत्। जले स्थितस्य तस्य भेकस्य रटनं श्रुत्वा सिंहः भयेन अकम्पयत्। स परितः विलोक्य अवादीत्-अहो! भीषणो ध्वनिः, कुतः अयं समागच्छतीति ज्ञातुं न शक्नोमि। न कोऽपि अत्र दृष्टिपथम् आयाति भयानको जन्तुः, किं पलाय्य प्राणरक्षा कर्तव्या इदानीम्? नहि नहि आपत्सु धैर्यं धरन्ति बुद्धमन्तः।

**प्र.३. केषाञ्चन त्रयाणां प्रश्नानां संस्कृतभाषया उत्तरं देयम् । ६**

(१) गङ्गां भुवमानेतुं कः तपस्याम् अकरोत्? (२) का स्वप्ने रावणविनाशम् अपश्यत्?
(३) उर्वस्याः पुत्रः कः आसीत्? (४) त्रिजटया का सागरे पतिता दृष्टा?

**प्र.४. (क) त्रयाणां सन्धिविच्छेदं कुरुत । ३**

(१) नातिदूरे ।(२) कृतोपकारः।(३) पतितोऽस्मि ।(४) गतिरियम् ।

**(ख) त्रयाणां समासनामनिर्देशपूर्वकं विग्रहः कार्यः । ३**

(१) महौषधिः।(२) भीमदर्शनाः।(३) स्वल्पकायः।(४) पादप्रहारः।

**(ग) त्रीन् शब्दान् स्ववाक्येषु योजयत । ३**

(१) चरन्ति।(२) दारुणः।(३) उद्भवन् ।(४) सहिष्यते।

**(घ) ''अर्च्धातोः'' अथवा ''धाधातोः'' लृट्लकारे (सामान्यभविष्यत्काले) सर्वरूपाणि लिखत । ६**

**प्र.५. निम्नलिखितवाक्येषु पञ्चानां संस्कृतभाषया अनुवादः कार्यः । १०**

(१) न्यायाधीश चोर को दण्ड देता है। (२) बादल आकाश में गरजते हैं। (३) अध्यापक पढ़ाई के विषय में विचार करते हैं। (४) गाँधीजी अपने बर्तन स्वयं माँजते थे। (५) वह चोरी नहीं करेगा। (६) मैं गायों का पालन करूँगा।

(1) The Judge punishes the thief. (2) The clouds thunder in the sky. (3) The teacher is thinking about teaching. (4) Gandhiji used to wash his utensils himself. (5) He will not steal. (6) I will rear cow.

❑ ❑ ❑

# भारतीय-विद्या-भवनम्, मुम्बई - ७

## ( सरल - संस्कृत - परीक्षा - विभागः )

## संस्कृत-कोविदः

## SAMSKRITA KOVIDA

**तृतीयं प्रश्नपत्रम् - Third Paper**

**( समयः १०.३० तः १२.३० )** **( पूर्णाङ्काः ५० )**

**प्र.१. केचन त्रयः श्लोकाः/हिन्द्या /आंग्लभाषया /माध्यमभाषया व्याख्येयाः । ९**

(१) आदित्य भो लोककृताकृतज्ञ लोकस्य सत्यानृतकर्मसाक्षिन् ।
मम प्रिया सा क्व गता हृता वा शंसस्व मे शोकवशस्य सत्यम् ।।

(२) पद्मानना पद्मविशालनेत्रा पद्मानि वानेतुमभिप्रयाता ।
तदप्ययुक्तं नहि सा कदाचिन्मया विना गच्छति पङ्कजानि ।।

(३) इति प्रतिश्रुते राज्ञा जानकीमाश्रमान्मुनिः ।
शिष्यैरानाययामास स्वसिद्धिं नियमैरिव। ।

(४) सा लुप्तसंज्ञा न विवेद दुःखं प्रत्यागतासुः समतप्यतान्तः ।
तस्याः सुमित्रात्मजयत्नलब्धो मोहादभूत्कष्टतरः प्रबोधः ।।

**प्र.२. सप्रसङ्गं त्रयाणां वाक्यानामर्थं स्वभाषया लिखत । ६**

(१) श्रुत्वा शरण्या शरणार्थमन्यं कथं प्रपत्स्ये त्वयि दीप्यमाने। (३) श्रुतस्य किं तत्सदृशं कुलस्य। (२) इयं गोदावरी रम्या पुष्पितैस्तरुभिर्वृता। (४) नृपतेः प्रीतिदानेषु वीतस्पृहतया यथा।

**प्र.३. निम्नलिखित-गद्यखण्डस्य हिन्द्या/आंग्लभाषया/माध्यमभाषया अनुवादः कार्यः। १०**

चतुष्पदां मध्ये गजः खलु दर्शनीयः पशुः। भूधराकारशरीरस्य कन्दराकारं मुखं लम्बमाना शुण्डा च विलसति। अस्य ग्रीवा लम्बा न भवति। नेत्रे अति लघुनी कर्णौ च शूर्पाकारौ भवतः। अयं स्तम्भानुकल्पैर्नातिमनोहरैः सुदृढैश्चतुर्भिः पादैः शोभते। शुण्डैवास्य नासिकापि भवति। अनयैवायं श्वसिति पानीयं वा पिबति। पुष्पाण्यपि चेत् शक्नोति अनयायम्। इयमेवास्य हस्तस्थाने वर्तते। अतोऽयं करी, हस्ती वेत्युच्यते।

**अथवा**

सोऽपि साधुस्वभाव: यथाशक्ति रमेशस्य लेखे दोषान् दर्शयित्वा मौनमतिष्ठत्। तदा रमेश: सानुनयं प्राह मित्र! देहि तव लेखपुस्तकम्। येनाहं त्वल्लिखितान् लेखान् पठित्वा,तव शैलीमधीत्य, अनुगृहीतो भवेयम्। हरि: सारल्येन स्वकीयं लेखपुस्तकं रमेशायाददात्। सोऽपि तद् गृहीत्वा त्वरितै: पदै: गृहमगच्छत्। तत्र स सर्वं तत् पुस्तकं सावधानतया पठित्वा लघुना हस्तेन भकारस्य स्थाने मकारं, सकारस्य स्थाने चकारं, तत्र तत्र विसर्गमनुस्वारं च लोपयित्वा सर्वं लेखं दूसयामास निवर्तयामास च सायं हरये तस्य लेखपुस्तकम्।

**प्र.४. (क) त्रयाणां विग्रहवाक्यानि विलिख्य समासनामानि लिखत । ३**

(१) यथाशक्ति। (२) पद्मशोभिता । (३) साधुस्वभाव:। (४) खाद्यवस्तूनि।

**(ख) त्रयाणां सन्धिं विभज्य सन्धिनाम लिखत । ३**

(१) नाथस्ते। (२) नियमैरिव। (३) भ्रातुश्चकार। (४) रमेश: ।

**(ग) त्रीणि पदानि स्ववाक्येषु योजयत । ३**

(१) प्रतिशोध:। (२) जलाशय:। (३) स्वरुचि:। (४) समराङ्गणम् ।

**(घ) त्रयाणां लकार-पुरुष-वचनानि लिखत । ३**

(१) अप्रीणात्। (२) सीदन्ति । (३) पचतु। (४) अभवताम्।

**(ङ) ''प्रीधातो:'' अथवा ''पठ्धातो:'' लोट्लकारे (आज्ञार्थे) सर्वरूपाणि लिखत।३**

**प्र.५. केषाञ्चित् पञ्चानां वाक्यानां स्वभाषया अनुवाद: कार्य: । ५**

(१) गुरु: सम्भाषणार्थे श्रेष्ठतमं छात्रं वृणोति। (२) मौनिन: कलहं नास्ति। (३) वयं सर्वे राष्ट्रस्य उत्कर्षाय यतिष्यामहे। (४) एकस्मिन् छात्रालये बहव: छात्रा: सन्ति। (५) दुर्जन: निष्कारणं सज्जनं गर्हयति। (६) पतञ्जलि: महाभाष्यकार: आसीत्।

**प्र.६. केषाञ्चित् पञ्चानां वाक्यानां संस्कृतभाषया अनुवाद: कार्य: । ५**

(१) ''कादम्बरी'' बाणभट्ट की अनुपम कृति है। (२) संस्कृत भाषा अनेक भारतीय भाषाओं की जननी है। (३) भवभूति का ''उत्तररामचरित'' श्रेष्ठ नाटक है। (४) भारतवर्ष ऋषियों की भूमि है। (५) आत्मज्ञान से मुक्ति मिलती है। (६) इस कोठी के सामने एक सुन्दर बगीचा है।

(1) "Kadambari " is the unique creation of Bana Bhatta.
(2) Sanskrit language is the mother of many Indian languages.
(3) The "Uttar Ramcharita"is the best drama of Bhavabhuti.
(4) India is the land of sages. (5) Emancipation is attained by self-realisation. (6) This mansion has a beautiful garden in the front.

❑ ❑ ❑

A11-Yellow

S-2024

# भारतीय-विद्या-भवनम्, मुम्बई - ७

## ( सरल - संस्कृत - परीक्षा - विभाग: )

# संस्कृत-कोविद:

## SAMSKRITA KOVIDA

### चतुर्थं प्रश्नपत्रम् - Fourth Paper

**( समय: २.०० त: ४.०० )** **( पूर्णाङ्का: ५० )**

**प्र.१. अधस्तनेषु केचन पञ्च श्लोका: हिन्द्या/आंग्लभाषया/माध्यमभाषया व्याख्येया: । २०**

(१) सर्वं परवशं दु:खं सर्वमात्मवशं सुखम् ।
एतद् विद्यात्समासेन लक्षणं सुखदु:खयो:।।

(२) दयितां यदि तावदन्वगाद् विनिवृत्तं किमिदं तया विना ।
सहतां हत जीवितं मम प्रबलामात्मकृतेन वेदनाम् ।।

(३) जाड्यं धियो हरति सिञ्चति वाचि सत्यं मानोन्नतिं दिशति पापमपाकरोति ।
चेत: प्रसादयति दिक्षु तनोति कीर्तिं सत्सङ्गति: कथय किन्न करोति पुंसाम्।।

(४) उदयति यदि भानु: पश्चिमे दिग्विभागे प्रचलति यदि मेरु: शीततां याति वह्नि:।
विकसति यदि पद्मं पर्वताग्रे शिलायां न भवति पुनरुक्तं भाषितं सज्जनानाम्।।

(५) शशिनं पुनरेति शर्वरी दयिता द्वन्द्वचरं पतत्त्रिणम् ।
इति तौ विरहान्तरक्षमौ कथमत्यन्तगता न मां दहे:।।

(६) धर्म एव हतो हन्ति धर्मो रक्षति रक्षित: ।
तस्माद्धधर्मो न हन्तव्य: मा नो धर्मो हतोऽब्रवीत्।।

**प्र.२. अधस्तनेषु द्वौ समाश्रित्य स्वभाषया निबन्धौ लेख्यौ । १०**

(१) मेघदूतम् । (२) किरातार्जुनीयम्। (३) दशकुमारचरितम्



[P.T.O.]

**प्र.३. अधस्तनेषु द्वयोः परिचयो देयः । १०**

(१) बाणभट्टः । (२) माघः । (३) कालिदासः ।

**प्र.४. अधस्तनस्य गद्यखण्डस्य स्वभाषयाऽनुवादः कार्यः । १०**

आसीत् प्राच्ये जनपदे वैशाली नाम पुरी। तत्र सेनजिदभिधो राजा भुवं प्रशशास। अयं महीपोऽतीव वीरो धीरश्चासीत्। अस्यैकः सुविज्ञो देवव्रतो नाम सचिवो बभूव। सचिवस्तादृशो मतिमानविद्यत,तत्किमपि कार्यं स सहसा न समपादयत। विषमायामपि वेलायामसौ अमात्यः सुविचार्यैव कार्यमकार्षीत्। सेनजिदस्मिन् सुतरामस्निह्यत। मन्त्रिणो वैदुष्येण ससुखं समयमयापयदेष नृपतिः। सर्वासु प्रजासु सर्वथा सौख्यसन्दोहहोराणामेवं बाहुल्यमजायत।

**अथवा**

अथ गत्वा स्वधाम कतिचित्कवलानगृहणात् आचमंश्च चामरग्राहिणमादिदेश ''विज्ञायागच्छ कथमास्ते तातः'' इति। गत्वा च प्रातिनिवृत्य च 'देव! तथैव।' इति विज्ञापितस्तेनागृहीतताम्बूल एवोत्ताम्यता मनसा अस्ताभिलाषिणि सवितरि सर्वानाहूय वैद्यान् किमस्मिन्नेवंविधे विधेयमधुनेति विषण्णहृदयः प्रपच्छ। ते च व्यज्ञापयन् देव! धैर्यमवलम्बस्व। कतिपयैरेव वासरैः पुनः स्वां प्रकृतिमापन्नं स्वस्थं श्रोष्यसि पितरमिति।

❑ ❑ ❑